International Journal of Sanskrit Research 2019; 5(6): 68-73

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(6): 68-73
© 2019 IJSR
www.anantaajournal.com
Received: 04-09-2019
Accepted: 06-10-2019

**Jnanesh Marathe**
Research Scholar, Dept. of Advaita Vedanta Rashtriya Sanskrit Vidyapeetha, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**Jnanesh Marathe**
Research Scholar, Dept. of Advaita Vedanta Rashtriya Sanskrit Vidyapeetha, Tirupati, Andhra Pradesh, India

# भक्तिः मोक्षलाभे सहायकं कारणं न तु साक्षात्कारणम्

**Jnanesh Marathe**

दृश्यमानेऽस्मिन् जगति भ्रम्यमाणा: जीवा: आधिभौतिकाधिदैविकाध्यात्मिकतापत्रयसन्तप्ताः संसारसागरादस्मात् नितरां मुमुक्षन्ति। स च मोक्ष: धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु परमपुरुषार्थः, 'न स पुनरावर्तते' इति श्रुतिप्रमाणात् तस्य नित्यत्वावगमात्। इतरेषां त्रयाणां धर्मार्थकामानां कर्मनिष्पाद्यतया कार्यत्वात्

अनित्यत्वं सिद्ध्यति। तथा चोक्तम् – 'तद्यथेह कर्मचितो लोकः क्षीयते। एवमेवामुत्र पुण्यचितो लोकः क्षीयते [1]।', 'ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति [2]।' एवं च प्रत्यक्षाश्रुतिस्मृतयः त्रयाणां धर्मार्थकामानामनित्यत्वं प्रतिपादयन्ति। तस्मात् सर्वे नित्यनिरतिशयसुखरूपम् आत्यन्तिकदु:खनिवृत्तिरूपं नित्यं मोक्षं वाञ्छन्ति। तच्च मोक्षपथप्रदर्शकं शास्त्रं दर्शनशास्त्रम्।

सर्वाणि च दर्शनानि मोक्षमेवोपेयतया लक्ष्यीकुर्वन्ति। परन्तु विभिन्नेषु दर्शनेषु मोक्षस्वरूपं भिन्नं भिन्नं प्रतिपादितम्। अद्वैतवेदान्ते आत्यन्तिकदुःखनिवृत्तिः परमानन्दावाप्तिश्च मोक्षः इत्युच्यते। सा खलु ब्रह्मणः स्वरूपभूता स्थितिरस्ति। उक्तं च – 'ब्रह्मभावश्च मोक्षः[3]।' इति। नास्ति अभिनवाप्राप्तिमोक्षः, अयमात्मनः निजस्वरूपमेव। आत्मस्वरूपावबोध: एव मोक्षः। 'अयमात्मा ब्रह्म' इति वाक्यात् आत्मा च ब्रह्मेति गीयते। लक्षणप्रमाणाभ्यां वस्तुसिद्धिः इत्यत: प्रथमत: तस्य मोक्षस्वरूपस्य ब्रह्मण: लक्षणं प्रतिपाद्यते। तच्च लक्षणं द्विविधम्। स्वरूपलक्षणं तटस्थलक्षणं चेति।

स्वरूपं सत् व्यावर्तकं स्वरूपलक्षणम्। यथा सास्नालाङ्गूलककुदविषाणित्वं गोत्वम्। तच्च सर्वदा गोषु सर्वासु वर्तते। अत: इदं गो: स्वरूपलक्षणम्। तथा 'सत्यंज्ञानमनन्तं ब्रह्म' इति 'सच्चिदानन्दं ब्रह्म' इति

---

[1] छा०उ० ८-१-६

[2] भ०गी०

[3] ब्र०सू० शां०भा० १-१-४

ब्रह्मण: स्वरूपलक्षणम्। 'आनन्दं ब्रह्मेतिव्यजनात्' इति श्रुतेः। न च आनन्दादय: ब्रह्मण: धर्मत्वेन कल्प्यन्ते तत्तस्य स्वरूपत्वात्। उक्तं च पद्मपादैः - 'आनन्द: विषयानुभव: नित्यत्वञ्च ब्रह्मणोऽपृथक्त्वेऽपि पृथगिवावभासन्ते।' इति।

यावल्लक्ष्यकालानवस्थितत्वे सति यत् व्यावर्तकं तत् तटस्थलक्षणम्। यथा गन्धवत्त्वं पृथिव्याः लक्षणम्। तच्च लक्षणं घटोत्पत्तिक्षणे विनष्टे च घटे नास्ति, उत्पन्नं द्रव्यं क्षणमगुणमक्रियञ्च तिष्ठतीति नैय्यायिकसिद्धान्तत्वात् । नापि महाप्रयले सर्वकार्यध्वंसरूपे पृथिविपरमाणुषु गन्धः तिष्ठति। इत्थमिदं लक्षणं पृथिवीम्। आकाशादिभ्यो व्यावर्तयति। तथैव जगज्जन्मस्थितिलयकारणत्वं ब्रह्मणः तटस्थलक्षणम्। पारमार्थिकसत्तायां जगतः। अभावात् तदुत्पत्यादि नास्तीति यावल्लक्ष्यकालानवस्थितत्वं वर्तते। तत्र श्रुतिप्रमाणं यथा –

'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद् ब्रह्म[4]।' इति। तंत्वौपनिषदं पुरुषं पृच्छामि इत्यादिश्रुतिवचनाद् ब्रह्मणः उपनिषन्मात्रवेद्यत्वं प्रतिपाद्यते। 'सदेव सोम्येदमग्र आसीत्। एकमेवाद्वितीयम्[5]', 'आत्मा वा इदमेक एवाग्र आसीत्[6]', तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्। 'अयमात्मा ब्रह्म सर्वानभू[7]' इत्यादीनि वाक्यानि सृष्टेः प्राक् जगत: सदात्मकत्वं ब्रह्मस्वरूपञ्च प्रतिपादयन्ति। तादृश: ब्रह्मस्वरूपावाप्तिरेव मोक्षः इति उक्तपूर्वः। एतादृशः मोक्ष नोत्पाद्यः नित्यत्वात्, न विकार्य: अविकारीत्वात्, नाप्य: नित्यप्राप्तात्मस्वरूपत्वात्, नापि संस्कार्य: शुद्धत्वात्। मोक्षोऽयं प्राप्तस्यैव प्राप्तिः कण्ठग्रैवेयकवत्। न तु अप्राप्तस्य प्राप्तिः इति। आत्मस्वरूपमविद्यया आच्छादितम्, तस्याः अविद्यायाः नाशे स्वात्मस्वरूपप्राप्तिः इति प्राप्तस्यैव प्राप्तिः मोक्षः। तस्मादविद्यानिवृत्तिरपि मोक्षपदेनाभिधीयते। अविद्यानिवृत्तिमात्रे माक्षः इति व्यवहारः। यथा रज्वादौ सर्पाद्यज्ञाननिवृत्तौ सर्पादिनिवृत्तिः। तदेव प्रतिपादितं वार्तिककारेण सुरेश्वराचार्येण बृहदारण्यकवार्तिके – "फलञ्च मोक्षोऽविद्यानिवृत्तिर्वा[8]" इति ।

**मोक्षसाधनम्**

अन्तरङ्गबहिरङ्गाभ्यां मोक्षसाधनं द्विविधम्। अन्तरङ्गसाधनं परमात्मनो व्यञ्जकम्। श्रवणमनननिदिध्यासनानि मोक्षप्राप्तये अन्तरङ्गसाधनानि। एतेषामन्तरङ्गसाधनत्वे श्रुतिप्रमाणं यथा – 'आत्मा वा अरे द्रष्टव्य श्रोतव्यो मन्तव्यो निदिध्यासितव्य:[9]'। इति। अत्र आत्मनः दर्शनमनूद्य तत्साधनत्वे श्रवणमनननिदिध्यासनानि विहितानि। तत्र श्रवणं नाम षड्विधतात्पर्यलिङ्गैरशेषवेदान्तानामद्वितीये वस्तुनि तात्पर्यावधारणम्। मननं नाम श्रुतस्य अद्वितीयवस्तुनः वेदान्तानुगुणयुक्तिभिः अनवरतमनुचिन्तनम्। निदिध्यासनं तु विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्ययप्रवाहः इति। एतैः श्रवणमनननिदिध्यासनैः ब्रह्मात्मैक्यापरोक्षज्ञानाद् अविद्यानिवृत्तौ मोक्षः इति अद्वैतिनः सिद्धान्तयन्ति। 'ज्ञानात् ऋते न मुक्तिः', 'तमेव विदित्वातिमृत्युमेति', 'नान्यः पन्थाः विद्यतेऽयनाय', 'तरति शोकमात्मविद्' इत्यादयः श्रुतयः आत्मज्ञानादेव बन्धनिवृत्तिः इति प्रतिपादयन्ति। श्रवणादिभिः संस्कृत: सन् तत्त्वमस्यादिवाक्यार्थावबोधे जीवब्रह्मणोः ऐक्यं सम्भवति। तत्त्वमस्यादिवाक्यानि कथम् अखण्डार्थात्मतत्त्वं प्रतिपाद्याविद्याकार्यभूतप्रपञ्चं नाशयन्ति तदत्र विचार्यते। 'तत्त्वमसि' इति उपदेशपरकवाक्यम्। तत् ब्रह्म त्वं जीव: असि। किं लक्षणं तद्ब्रह्म? इति जिज्ञासायां लक्षणमाह – 'प्रज्ञानं ब्रह्म'

[4] तै०उ० ३-१

[5] छा०उ० ६-२-१

[6] ऐ०उ० २-१-१-१

[7] बृ०उ० २-५-१९

[8] बृ०उ० १-४-७

[9] बृ०उ० २-५-६

इति। किं तद् ब्रह्म इति जुगुप्सायाम् – 'अयमात्मा ब्रह्म' इति। ततः मनननिदिध्यासनाभ्यां संस्कृतेन मनसा 'अहं ब्रह्मास्मि' इति अपरोक्षानुभूतिः भवति।

बहिरङ्गसाधने भक्तिरन्तर्भवति। यद् विहितं कर्म तत् बहिरङ्गसाधनम्। विविदिषोत्पादनद्वारा ज्ञाने परम्परया

कारणत्वात्, ज्ञानोत्पादे बहिर्भूतमिति विविदिषामात्रे साक्षात्कारणम्। तस्माद्भक्तिः मोक्षसाधने सहायकी इति अस्मिन् पत्रे प्रतिपाद्यते।

इतश्च मोक्षे तावदधिकारभेदन उत्तममध्यमाधमभेदेन त्रिविधः अधिकारिणः सन्ति। उत्तमाधिकारिणां कृते ज्ञानमेव साधनम्। मध्यमाधमाधिकारिणां बुद्धिमान्द्यात् ज्ञाने ब्रह्मात्मैकत्वविचारे वा अधिकाराभावात्, भक्तिरेव

तेभ्यः निरतिशयानन्दपरमपदमोक्षावाप्तये मार्गः इति विदुषां समयः।

**भक्तिः**

भगवतः भजनं, निरन्तरं स्मरणं, गुणकीर्तनं वा भक्तिरित्युच्यते। भक्तिः, उपासना, ध्यानम् इत्यनर्थान्तरम्।

मुक्तिप्रयोजिका विद्या उपासना। वस्तुस्वरूपानपेक्षः पुरुषेच्छामात्रतन्त्रो मानसप्रवाहः उपासना इति। उपासनायाः

निर्वचनं श्रीमच्छङ्कराचार्यैः श्रीमद्भगवद्गीतायाः भाष्ये कृतं यत् – 'उपासनं नाम यथाशास्त्रम् उपास्यस्य अर्थस्य विषयीकरणेन सामीप्यम् उपगम्य तैलधारावत् समानप्रत्ययप्रवाहेण दीर्घकालं यद् आसनं तद् उपासनम् आचक्षते[10]।' अमुमेवार्थं भक्ति इति प्रकटयन् नारदपञ्चरात्रकारेण उक्तम् – 'सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्मलम्।

हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते।' इति। साधारणतः चिन्तयामः चेत् आराध्यविषयकरागविशेषः भक्तिः। आराध्यत्वेन ज्ञानमिति। अर्थात् आराध्यः-आराधकः, साध्यः-साधकः, पूज्यः-पूजकः, उपास्यः-उपासक, भगवान्-भक्तः इत्येतादृशः भावः

भक्तिः। भगवति ईश्वरे वा अशेषः प्रेमभाव एव भक्तिः इत्यपि वक्तुं शक्यते। अस्याः भक्तेः महत्त्वं परमभक्तेन प्रह्लादेन श्रीमद्भागवते कृतम् – 'प्रीणनाय मुकुन्दस्य न वृत्तं न बहुज्ञता।

न दानं न तपो नेज्या न शौचं न व्रतानि च। प्रीयतेऽमलया भक्त्या हरिरन्यद् विडम्बनम्[11]।' इति

सा च भक्ति साधनरूपासाध्यरूपाभ्यां द्विधा वर्तते। तत्र साधनरूपा भक्तिः नवधा वर्तते – 'श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्। अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥' इति।

भगवतः भक्तेः स्वरूपं सत्सङ्गतेः महत्त्वं चात्र सम्यक् प्रतिपादितम्। साध्यरूपा भक्तिः प्रेममयी भक्तिः।

पुनः पुष्टिभक्तिः, मर्यादाभक्तिः चेति भक्तिः द्विधा इति केचित्। श्रीचैतन्यमतानुसारं पुनः भक्तिः द्विधा – विधिभक्तिः,

रुचिभक्तिः चेति। इत्थं नैकानां विदुषां मतानुसारेण भक्तेः विभिन्नता वर्तते। यथा भक्तेः विभागः प्रदर्शितः तथैव

भक्तानामपि आर्तजिज्ञास्वार्थार्थीज्ञानीभेदेन चत्वारः विभागः श्रीकृष्णेन भगवता प्रदर्शितः। यथा – 'चतुर्विधा भजन्ति मां जनाः सुकृतिनोऽर्जुनः। आर्तो जिज्ञासुरार्थी ज्ञानी च भरतर्षभ[12]॥' इति। एते चत्वारः निरन्तरं भगवतः वन्दनं, स्मरण, गुणकीर्तनं च कुर्वन्ति। एतेषु चतुर्षु भक्तेषु ज्ञानी एव श्रेष्ठः भवति इत्यपि गीतायामुक्तं वर्तते। एते भक्ताः स्वभक्त्या एव परमपदं प्राप्नुवन्ति। भक्तिरेव मोक्षप्राप्तये प्रधानं साधनमिति केचन। अद्वैतिनस्तु ज्ञानमेव प्रधानं साधनमिति। तस्मात् साम्प्रतं भक्तिः मोक्षसाधने मुख्यं साधनम् आहोस्वित् सहायकसाधनमित्यस्मिन् विषये चिन्ता प्रतायते।

**मोक्षसाधनं भक्तिः**

मोक्षसाधने भक्तिरेव प्रधानं साधनमिति भक्त्या एव तादृशस्य परमपदस्य प्राप्तिः भविष्यति नान्येन साधनेन। तत्र प्रमाणरूपेण प्रदर्श्यते भागवतवचनं यथा – 'न साधयति मां योगो न साङ्ख्यधर्मं

[10] भ०गी०शा०भा० १२-३

[11] भा०पु० ७-७-५१,५२

[12] भ०गी० ७-१६

उद्धव। न स्वाध्यायस्तपो त्यागो यथा भक्तिर्ममोर्जिता॥[13]' इति। पुनश्च साक्षाद्भगवत्पादानां श्रीमच्छङ्कराचार्याणामपि वचनं भक्तेः मोक्षसाधनत्वे प्रमाणम्। मोक्षसाधनसामग्र्यां भक्तिरेव गरीयसि भगवत्पादैः स्वरचिते अद्वैतप्रकरणग्रन्थे विवेकचूडामणौ मोक्षप्राप्तये भक्तेः श्रेष्ठसाधनत्वं प्रतिपादितम्। तस्मान्मोक्षलाभे भक्तिरेव श्रेष्ठसाधनमित्येवं प्राप्ते उच्यते, न। मोक्षलाभे ज्ञानमेव प्रधानं साधनम्। भक्तिस्तु सहायकसाधनम्। भक्तिः ज्ञानमुत्पादयति मात्रम्। यदुक्तं भगवत्पादानामुक्तिरिति तत्र भक्तिः इति पदेन ज्ञानमेव विवक्षितम्। उक्तं च – 'स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते। स्वात्मतत्त्वानुसन्धानं भक्तिरित्यपरे जगुः[14]॥' इति। तस्मान्मोक्षलाभे भक्तिः न साक्षात्कारणम्।

इतश्च मोक्षसाधनानि कर्मभक्तिज्ञानभेदेन त्रिविधानि इति सार्वजनीनम्। भगवतः कर्मणा शुद्धा भक्तिः उदेति, तया शुद्धभक्त्या भगवत्साक्षात्काररूपं ज्ञानं सम्भवति। आत्मसाक्षात्कारश्च मोक्षः इति असकृद् उच्यते। भक्तिः ज्ञानमात्रमुत्पादयति, तेन ज्ञानेन च मोक्षः प्राप्यते। तस्मान्मोक्षसाधने भक्तिः सहायकी इति उच्यते। अर्थाद् भक्तिः त्रिषु मुक्तिषु क्रममुक्तिप्रदायिनी। अयं शङ्का कथं भक्तिः क्रममुक्तिप्रदायिनी? इति चेदुच्यते - भक्त्या अन्तःकरणस्य मलं दूरीभूय, तत् शुद्धं भवति। शुद्धमन्तःकरणं बाह्यविषयं प्रति न गच्छति, सर्वदा अन्तर्विषयं प्रति गच्छति। बाह्यविषयाणामभावे मनसः स्थिरीकरणं भवति। एकाग्रचित्ते परमात्मनः बिम्बः प्रतिफलति। तस्य फलरूपेण बाह्यविषयेषु वैराग्यमागच्छति, ततः सर्वदा अन्तर्मुखः सन् परमात्मस्वरूपसाक्षात्कारं प्राप्नोति। इयमेव क्रममुक्तिः मन्दमध्यमाधिकारिणां कृते प्रतिपादिता। तदुक्तं बृहदारण्यकवार्तिके – 'इत्येतादृशज्ञाने जननीये परमाधिकारिणां योग्यता आवश्यकी। तदर्थं नित्यकर्मानुष्ठानं, तेन पुण्यसम्पत्तिः, तथा दुरितक्षयः, ततः चित्तशुद्धिः, तथा संसारमण्डले नित्यानित्यविवेकः, तेन वैराग्यं, ततो मुमुक्षत्वं चेत्येवं क्रमेण साधनचतुष्टयसम्पत्तिमती योग्यता। किं च, कर्म तत्साधनत्यागरूपः सन्यासः। तेन योगः चित्तस्य बाह्यवैमुख्येन अन्तर्मुखतालक्षणः। एवं सम्पन्नयोग्यतावत एव अधिकारिणो महावाक्यार्थविज्ञानेन साक्षात्कारपर्यवसायिना अविद्यातत्कार्यनाशे स्वात्मरूपे ब्रह्मण्यवस्थानम्।" इति। ब्रह्मात्मैक्यज्ञाने विचारे वा असमर्थानां मन्दमध्यमाधिकारिणां कृते क्रममुक्तिप्राप्तये कर्मभक्ती साधने

वेदान्तेषु प्रतिपाद्यते। तदुक्तं विद्यारण्यस्वामिना – 'विचारक्षममाश्च तच्छ्रुत्वोपासते गुरोः [15] ।' इति। भक्त्या मानवाः संसारसागरादस्मात् मोक्षं प्राप्नुवन्ति, भक्तिश्च परम्परया माक्षं साधयति इति प्रस्थानत्रये

प्रतिपादितमिति अत्र विचार्यते।

**श्रुतिप्रस्थानम्**

भक्तिः(उपासना) मोक्षलाभे सहायको इति प्रतिज्ञातम्। उपासकस्य मोक्षः क्रमेण भवति नतु साक्षात्। स

च उपासकः देवयानं मार्गमवलम्ब्य अग्नेः वायुलोकम्, वायुलोकात् वरुणलोकम्, तस्मात् वरुणलोकाद् इन्द्रलोकम्,

इन्द्रलोकात् प्रजापतिलोकं गत्वा ब्रह्मलोकमवाप्नोति। तथा चोक्तं कौषतक्युपनिषदि – 'स एतं देवयानं पन्थानमासाद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकम्[16]।' इति। इत्थं स उपासकः देवयानमार्गेण बह्मलोकं गच्छति। तत्र तत्त्वं साक्षात्कृत्य ब्रह्मणा सह मुच्यते।

तत्प्रतिपादितं तैत्तिरीयके – 'वेदान्तविज्ञानसुनिश्चितार्था सन्यसयोगाद्यतयः शुद्धसत्त्वाः। ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे[17]।' इति। पुनश्च तदेव बह्म त्वं विद्धि नेदं तदिदमुपासते इति केनोपनिषदुक्तरीत्यापि उपासनया साक्षात् मोक्षः न लभ्यते इति प्रतिपादितम्। उपासनया सगुणब्रह्मणः प्राप्तिः

[13] भा०पु० ११-१४-२०

[14] वि०चू० ३२.३३

[15] प०द० ९-२८

[16] कौ०उ० १-३

[17] मु० ३-२-६

भवति न तु निर्गुणस्य ब्रह्मणः। निर्गुणस्य ब्रह्मणः प्राप्तिः ज्ञानेन एव सम्भवति। तस्मात् उपासना मोक्षाय सहायकी।

**स्मृतिप्रस्थानम्**

स्मृतिप्रस्थानेऽपि मोक्षाय भक्तेः सहायकत्वं प्रतिपादितम्। स्मृतिशास्त्रं कथनेन श्रीमद्भगवद्गीता अस्माकं स्मृतिपथमागच्छति। भक्त्या त्वनन्यया शक्य अहमेवं विधोऽर्जुनः इति गीतोक्तरीत्या मानवः अनन्यया भक्त्या भगवन्तं साक्षात्करोतीत्यत्र वर्णितम्। सा च अनन्या भक्तिः कीदृशी इति जिज्ञासायामुक्तम् – 'मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः। निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव[18]॥' इति। परन्तु अनया भक्त्या अनित्यफलं प्राप्नुवन्ति, न तु नित्याख्यं मोक्षफलम्। अन्तवन्तु फलं तेषां तद्भवत्यल्पमेधसाम् इत्यनया स्मृत्या तेषां मन्दमतीनामनित्यफलप्राप्तिः प्रमीयते। स मामेति इत्यनेन ब्रह्मलोकप्राप्तिः (ब्रह्मसायुज्यं) बोध्यते। ततः कल्पान्ते ब्रह्मणा सह ते मुच्यन्ति । तदुक्तं स्मृतौ – 'ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्॥' इति। इतश्च भक्तेः मोक्षलाभे सहायकत्वं क्रममुक्तिप्रदायकत्वं च साक्षाद्भगवता श्रीकृष्णेनोक्तं यथा – 'भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्[19]॥' इति। अस्मात् श्लोकात् स्पष्टं ज्ञायते यत् – प्रथमे भक्तिः, तया भक्त्या तत्त्वज्ञानम्, ततः मोक्षः इति। श्लोकस्थ तदनन्तरम् इत्यस्मात्पदात् भक्तेः साक्षान्मोक्षकारणत्वं निषिध्यते। तस्माद्भक्तिः मोक्षाय परम्परया कारणम्। गीतायां पापीनामुद्धारकेन श्रीकृष्णेन परमपदमोक्षप्राप्तये कर्मभक्तिज्ञानानां क्रमः श्लोकाभ्यां निर्णीतः यथा – 'ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः। अनन्येनैव योगेन मां ध्यायन्त उपासते॥ तेषामहं समुद्धर्ता मृत्युसंसारसागरात्। भवामि न चिरात्पार्थ मय्यावेशितचेतसाम्[20]॥ इति। अनन्येनैव योगेन इत्यत्र पूर्वोक्तया अनन्यया भक्त्या इति ज्ञातव्यम्। उपरोक्ताभ्यां गीतोक्तश्लोकाभ्यामिदं ज्ञायते यत् - प्रथमे कर्मणां सन्न्यासः कर्तव्यः, तेन वैराग्येन ईश्वरे भक्तिः उत्पद्यते भगवतः उपासना वा क्रियते, ततः तत्त्वज्ञानं संम्भवति। तत्त्वज्ञानमेव तेषां भक्तानामुच्चावचात्मकात् संसारसागरादुद्धारकमिति।

**युक्तिप्रस्थानम्**

पुनश्च युक्त्यापि भक्तेः क्रममुक्तिदायकत्वं सिद्ध्यति। भकया आत्मनः तत्त्वज्ञानं सम्भवति, ततः मोक्षः इति। यथा विद्यावारिधिः इति उपाधये प्रथमे आचार्यकक्षायाम् उत्तीर्णता अपेक्षते, ततः विद्यावारिधौ प्रवेशः, ततः उपाधिः इति क्रमः। यदि आचार्यकक्षायामनुत्तीर्णश्चेत् विद्यावारिधिप्रवेशपरीक्षायामेव तस्य अधिकारो न स्यात्। किमितः परम्। तथैव मोक्षलाभाय आदौ तावद् भक्तिः अपेक्षते, ततः ज्ञानं सम्पाद्यते, तेन मोक्षः इति भक्तेः क्रममुक्तिदायकत्वं प्रतिपादितम्। युक्तिप्रस्थानेऽपि अर्चिराद्यधिकरणे सगुणब्रह्मोपासकानां देवयानमार्गेण वाय्वादिक्रमेण ब्रह्मलोकप्राप्तिः प्रतिपादितः। ततः कल्पान्ते ब्रह्मणा सह ते मुच्यन्ति इति। कार्यं बादरिरस्य गत्युपपत्तेः, सामीप्यात्तु तद्व्यपदेशः, कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् इत्यादिभिः सूत्रैः भक्तेः उपासनस्य वा क्रममुक्तिदायकत्वं प्रतिपादितम्।

इत्थं श्रुतिस्मृतियुक्तिभिः भक्तिः मोक्षलाभे सहायकं कारणं न तु साक्षात्कारणम् इति प्रतिपाद्य विरम्यते।

**संदर्भ**

1. छान्दोग्योपनिषद्
2. भगवद्गीता
3. ब्रह्मसूत्रशाङ्करभाष्यम्
4. तैत्तिरियोपनिषद्

---

18 भ०गी० ११-५

19 भ०गी० १८-५५

20 भ०गी० १२-६,७

5. ऐतरेयोपनिषद्
6. बृहदारण्यकोपनिषद्
7. भागवतपुराणम्
8. विवेकचूडामणिः
9. पञ्चदशी
10. कौषतक्युपनिषद्
11. मुण्डकोपनिषद्